कृष्णतारस्तु मल्लिकाक्षः प्रकीर्त्तितः । श्वेतजावेष्टितं कृष्ण रेखया तारकं च यत् । मल्लिकाक्षः स विज्ञेयः स्वामिनः सुखवर्द्धनः । सिततयाऽप्रशस्तश्च स्वामिनः क्लेशवर्द्धनः । सर्वश्वेतश्च कृष्णश्च रक्तपीतस्तथैव च । एते सांग्रामिकाः प्रोक्तास्तुरगा मुनिसत्तमैः । हरिताः किल जायन्ते वाजिनः पुण्यदर्शनाः । यतो हिता नरेन्द्राणामायुरारोग्यश्रीप्रदाः । रक्तास्यमेहनः शस्तः श्यामकर्णस्तु यः सितः । कपोतेन च वर्णेन योहयः शुक्लकेशरः । शुक्लपादमुखो वाजी प्रशस्तः परिकीर्त्तितः । चतुर्णां चैव पादानां शुक्लता यस्य वाजिनः । मुखं सिततरं चैव पञ्चभद्रः स उच्यते । श्वेतमण्डलचित्रश्च भर्त्तुः सर्वार्थसाधकः । पाण्डुरा यस्य रेखा स्यात् पृष्ठवंशानुगामिनी श्वेतकृष्णशिरा यश्च नैव धन्यः प्रकीर्त्तितः । अन्यवर्णं शिरो यस्य पुच्छं वा यस्य वाजिनः । पुच्छेन शिरसा वापि नानावर्णेन निन्दितः । अव्यक्तवर्णो योवाहस्तथा तित्तिरिसन्निभः । कुत्सितो वानराक्षश्च योवा व्याघ्रावलोढ़कः"

तथाङ्गविकृतितोऽशुभलक्षणम् । "काकुदी कृष्णजिह्वश्च कृष्णसेफाण्डतालुकः करालो हीनदन्तश्च शृङ्गी वाधिकदन्तकः । एकाण्डश्चैव जाताण्डः कञ्चुको त्रिसरी तथा । मार्ज्जारपादो व्याघ्राभस्त्रिकर्णो द्विखुरी स्तनी । यमयो वामनश्चैव काकतित्तिरसंनिभः । वानराक्षो विड़ालाक्षो मुशली चेन्द्रदृष्टिकः । येषां पृष्ठे हतो भर्त्ताऽजातदन्तस्तथैव च । एते दोषान्विता वाहास्त्याज्या वै भूतिमिच्छता । धनप्राणहराह्येते बन्धुविग्रहकारकाः । एषां चिह्नं प्रवक्ष्यामि येन जानन्ति सादिनः । पूर्व्वशास्त्रानुसारेण मुनीनां वचनं यथा । आवर्त्तो यत्र ककुदे काकुदी स उदाहृतः । करालैर्वाधरे दन्तैर्ज्जायते यस्य चोत्तरम् चतुर्भिः पञ्चभिश्चैव हीनदन्तः प्रकीर्त्तितः । सप्तभिश्चाष्टभिर्दन्तैर्ज्जातश्चाधिकदन्तकः । अङ्गुष्ठपर्वसंकाशं छागशृङ्गोपमन्तथा । जम्बूवदररूपं च तथा चामलकोपमम् । आम्रास्थिसदृशं चापि हरीतक्याः फलोपमम् । दग्धचर्म्मनिभं चापि बालसंस्थानमेव च । कालङ्कर्णान्तरे यस्य केशान्ते चापि दृश्यते । धौरेयः सर्वपापानां वाहः शृङ्गी स कीर्त्तितः । एवंविधेन शृङ्गेण शृङ्गी राष्ट्रे न वासयेत् । एकतोलप्रमाणेन मुष्केणैकाण्डसंज्ञकः । अत्यन्तरोमशाभ्यां तु ताभ्यां जाताण्ड उच्यते । स्कन्धे वक्षसि बाह्वोश्च अंसदेशे तथैव च । अन्यवर्णो भवेद्वाजी कञ्चुकी स प्रकीर्त्तितः । यस्यान्यवर्णा रेखा स्यात्पादे कूर्च्चे च वाजिनः । मार्ज्जारपादः प्रोक्तोऽसौ सोऽधन्यः कुलनाशनः । अन्यवर्णस्य वाहस्य शिरः कृष्णं यदा भवेत् । त्रिसरी नाम स प्रोक्तो भर्त्तुः कुलविनाशनः । द्विखुरं गोखुराकारखुरैर्विद्याद्विचक्षणः । अथ वा त्रिबलियुक्तै र्निम्नमध्यैश्च निर्दिशेत् । वृषणाभ्यां सुजाताभ्यां स्तनाभ्यां विहिता स्तनी । त्रिभिः कर्णैस्त्रिकर्णी च व्याघ्राभो व्याघ्रवर्णकः । एकेनाङ्गेन हीनेन निम्नेन च विशेषतः । यमयं वाजिनं विद्याद्वामनं वामनाकृतिम् । वर्णादेकेन पादेन अन्यवर्णेन यो हयः । मुसलीति स विख्यातो भर्त्तुः कुलविनाशनः । विरोधं नैव यो याति दृष्ट्वाश्वान् मुष्कवर्जितः । इन्द्रदृष्टिः स विख्यातो भर्त्तुः कुलविनाशनः । अथ चेद्बड़वां दृष्ट्वा विरोधमधिगच्छति । निगूढ़ वृषणाख्यस्तु स धन्यः सर्वकामदः । द्विवर्षं तु समारभ्य यावद्वा पञ्चवार्षिकः । दन्तानां मुष्कयोश्चैव सम्भवो वाजिनः स्मृतः । अत ऊर्द्ध्वं न जायन्ते मुष्कौ दन्ताश्च वाजिनः । अशुभं तु फलं वाच्यमभावे न ततस्तथा" ।

अथाश्वाङ्गचेष्टादिशुभाशुभम् । अतःपरं प्रवक्ष्यामि तुरगाणां विभागतः ज्वलितेन यथाङ्गेन फलं वाच्यं शुभाशुभम् । यदा ज्वलति वाहानां सर्व्वगात्रे हुताशनः । तदा विद्यादनादृष्टिमब्दमेकं न संशयः । अन्तःपुरविनाशस्तु मेहने ज्वलिते भवेत् । उदरे वित्तनाशस्तु पायौ पुच्छे पराजयः । उत्तमाङ्गे च वक्त्रे च स्कन्धे चैवासने तथा । भर्त्तुर्जयाय वाहानां ज्वलनं यत्र नेत्रके । धूमं ललाटे बाह्वोश्च तथा वक्षसि निन्दितम् । तत्रैव ज्वलनं शस्तं तथा नासासमुद्भवः । यदा व्याधिं विना वाजी ग्रासं त्यजति दुर्म्मनाः । अश्रुपातं च कुरुते तदा भर्त्तुरशोभनम् । स्वयमेव यदा वक्त्रं हृष्टो लोकयते हयः । खङ्गायप्रदाने तु तदा विद्याज्जयं प्रभोः । सर्वैदेव शिरोभ्रस्तु सर्वेषां नैव पूजितः । वामपादाभिघातस्तु प्रभोर्यात्रानिषेधकः । स्वामिनारूढ़मात्रेण दक्षिणं पार्श्वमात्मनः । तुरङ्गमो यदा न्यस्येत्तदा भर्त्तुर्जयो भवेत् । पुच्छं वाहं यदा वाहो वामतो विकिरेद्यदा । तदा भर्त्तुः प्रवासः स्यात् दक्षिणे विजयस्तथा । प्रकिरन्ति यदात्यर्थं सर्वे पुच्छं तुरङ्गमाः । अकस्मादेव जाता च तेषां भीतिः प्रभोःस्मृता" ।

अथाश्वमानम् "हस्तोऽङ्गुलानां विंशत्या चतुरुत्तरया स्मृतः । चतुर्हस्तस्तु विख्यातः शास्त्रोक्तेनोत्तमो हयः । अर्द्धहस्तेन हीनस्तु भवेन्मध्यस्तुरङ्गमः । मुष्टिन्यूनेन हस्तेन हीनश्चाप्यधमः स्मृतः । ऊर्द्ध्वमानप्रमाणं तु परिणाहं विनिर्दिशेत् ।